# आदर्शप्रश्नपत्रम् – 2022-2023

## संस्कृतम् (केन्द्रिकम्)

## Sanskrit Core (322)

## कक्षा – द्वादशी

**समयः – होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 12 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -**

| | |
|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः (ख) रचनात्मककार्यम् | - 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्तव्याकरणम् | - 20 अङ्काः |
| खण्डः (घ) I. पठित-अवबोधनम् | - 25 अङ्काः |
| II. संस्कृत - साहित्येतिहास - परिचयः | - 10 अङ्काः |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **खण्डः – क**<br>**अपठित - अवबोधनम् - 10 अङ्काः** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत –**<br>अधुना योगदर्शनस्य चर्चा सर्वत्र भवति। एतद् दर्शनं न केवलम् अतिप्राचीनम् अपितु नितान्तं वैज्ञानिकं दर्शनम्' अस्ति। महर्षिः पतञ्जलिः योगदर्शनम् उपदिष्टवान्। भारते एव योगदर्शनस्य आविर्भावः अभवत्। योगः देहात्मनोः प्रत्यक्षं वैज्ञानिकं साधनमस्ति। एतद्दर्शने शरीरस्य मनसः अपि नियमनं वर्णितम्। योगस्य परिभाषा अस्ति– "योगः चित्तवृत्तिनिरोधः"। चित्तवृतीनाम् अवरोधनेनैव योगस्य संसिद्धिः।अस्याम् अवस्थायां जीवः स्वरूपम् अधिगच्छति। योगस्य अष्ट अङ्गानि भवन्ति- यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः चेति। अस्माभिः जीवने सदा योगः सेवनीयः यतः योगेन जीवने नीरोगता आयाति। | 10 |
| | **(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )**<br>(i) अधुना कस्य दर्शनस्य चर्चा सर्वत्र भवति?<br>(ii) योगदर्शनं कः उपदिष्टवान्?<br>(iii) योगस्य कति अङ्गानि सन्ति? | 1x2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**<br>(i) योगस्य परिभाषा का अस्ति?<br>(ii) अस्माभिः जीवने किमर्थं योगः सेवनीयः?<br>(iii) योगस्य अष्टाङ्गानां नामानि लिखत? | 2x2=4 |
| | **(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत?** | 1x1=1 |
| | **(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्**<br>(i) "तिरोभावः" इत्यस्य विलोमपदं किम्?<br>(क) आविर्भावः (ख) चित्तवृत्तिनिरोधः<br>(ग) सेवनीयः (घ) बालभावः<br>(ii) "पुरातनम्" इत्यर्थे कः शब्दः अत्र प्रयुक्तः?<br>(क) प्रत्यक्षम् (ख) नियमनम्<br>(ग) दर्शनम् (घ) अतिप्राचीनम् | 1x3=3 |

| | | |
|---|---|---|
| | (ii) "अधुना योगदर्शनस्य चर्चा सर्वत्र भवति" अत्र क्रियापदं किम्?<br>(क) योगदर्शनस्य (ख) भवति<br>(ग) चर्चा (घ) अधुना<br>(iv) "वैज्ञानिकम्" इति विशेषणपदस्य विशेष्यपदं किम्?<br>(क) चर्चा (ख) योगः<br>(ग) दर्शनम् (घ) वर्णितम् | |
| | | |

## खण्डः – ख

## रचनात्मक–कार्यम् - 15 अङ्काः

| | | |
|---|---|---|
| 2. | **भवान् / भवती राघवः/ शान्ता। शैक्षिक-भ्रमण-दले समावेशाय प्रधानाचार्यां प्रति लिखिते आवेदन पत्रे रिक्तस्थानानि मञ्जूषातः चित्वा, पूरयित्वा च पुनः पत्रं लिखत –** | ½x10=5 |

सेवायाम्

(i) ..................................

राजकीयसर्वोदयसहशिक्षाविद्यालयः, दक्षिण-दिल्ली

विषयः - (ii) ........................।

मान्याः !

सादरं (iii) ................. अस्ति यद् अहम् एतस्मिन् (iv) ...................... एकादश्यां कक्षायाम् 'अ' वर्गे पठामि। एवं मया श्रूयते यद् आगामिनि शीतकाले अस्माकं विद्यालयात् किमपि (v) ............ नैनीतालं गमिष्यति। नूतन-स्थलानां दर्शने, नूतन-तथ्यानां ज्ञानार्जने च मम (vi) ................. अभिरुचिः। अतः अहम् अपि (vii) ................... दलेन सह गन्तुम् इच्छामि। एतदर्थं मया माता-पितृभ्याम् (viii) .................. अपि प्राप्ता। साग्रहं (ix) .................... यद् एतदर्थम् अनुमतिं प्रदाय (x) ....................... अयं जनः।

सधन्यवादम्,

भवतां शिष्यः/ शिष्या,

राघवः / शान्ता

**मञ्जूषा**

| |
|---|
| अनेन, महती, अनुमतिः, प्रार्थयामि, कृतार्थीकरणीयः, निवेदनीयम्, प्रधानाचार्याः, विद्यालये, शैक्षिभ्रमणदलम्, शैक्षिकभ्रमणदले समावेशाय निवेदनम्। |

| | | |
|---|---|---|
| 3. | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>एकदा भगवान् (i) ............ राजमार्गे गच्छन् अपश्यत् यत् (ii) ............ कश्चन भिक्षुः स्नात्वा भूयो-भूयः हस्तौ संयोज्य षड्दिशः प्रणमति स्म। बुद्धः तमुपगम्य (iii) ............... – महाशय! किं भवान् जानाति यत् दिग्भ्यः प्रणामनिवेदनस्य कः (iv) ............ अस्ति? भिक्षुः उदतरत् - भगवन्! नाहं जाने अस्य अभिप्रायम्। कृपया भवान् एव (v) ...............। बुद्धः अकथयत् – पूर्वदिशि कृतः नमस्कारः तु (vi) .......... गृहस्वामिने च भवति। दक्षिणदिक् आचार्याय, पश्चिमदिक् स्त्रीपुत्रादिभ्यः, उत्तरदिक् च मित्रादीनां कृते भवति। एवमेव ऊर्ध्वदिक् श्रमणब्राह्मणेभ्यः अधोदिक् च सेवकेभ्यः भवति। इदं श्रुत्वा भिक्षुः अब्रवीत्– (vii) ............ किमर्थं प्रणामः? वयं तु श्रेष्ठाः अतः (viii) ......... एव अस्मान्नमेयुः। तदा तथागतः अकथयत् – सेवकाः अपि अस्मद्वत् (ix) ......... सन्ति। तान् प्रति प्रणामः अस्मत्स्नेहं (x) ............ सौहार्दञ्च सूचयति।<br><br>**मञ्जूषा-**<br>वात्सल्यम्, सेवकाः, मातापितृभ्याम्, अभिप्रायः, सरोवरतटे, बुद्धः, अपृच्छत्, अभिज्ञापयतु, सेवकेभ्यः, मनुष्याः।<br><br>**अथवा**<br><br>**अधोलिखितसंवादे रिक्तस्थानानि पूरयत-**<br>**रमा** - तव विद्यालयः कुत्र अस्ति?<br>**गीता** – (i) ..................................।<br>**रमा** - किं तव विद्यालये पुस्तकालयः अपि अस्ति?<br>**गीता** – (ii) ..................................।<br>**रमा** - त्वं प्रतिदिनं पुस्तकालयं गच्छसि?<br>**गीता** - (iii) ..................................।<br>**रमा** - त्वं तत्र समाचारपत्राणि अपि पठसि?<br>**गीता** - (iv) ..................................।<br>**रमा** - किं तत्र पत्रिकाः अपि भवन्ति?<br>**गीता** - (v) ..................................। | ½×10=5<br><br><br><br><br><br><br><br><br><br><br><br><br><br><br><br>1×5=5 |
| | | |

| | | |
|---|---|---|
| 4. | निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –<br>1. क्या तुम वहाँ नहीं गये थे?<br>Didn't you go there?<br>2. राजा प्रजा की रक्षा करता था।<br>The king protected his people.<br>3. भारत देश में सभी का समान रूप से विकास होना चाहिए।<br>There should be equal development for everyone in India.<br>4. पक्षी पेड़ पर रहते हैं।<br>Birds live on trees.<br>5. पृथिवी सभी रत्नों से युक्त है।<br>The Earth contains all the gems.<br>6. छात्रों की प्रतिवर्ष शैक्षणिक यात्रा होती है।<br>Students have an academic tour every year. | 1×5=5 |

## खण्डः - ग

## अनुप्रयुक्तव्याकरणम् 20 अङ्काः

| | | |
|---|---|---|
| 5. | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- (केवलं प्रश्नषट्कम्)<br>(i) <u>सत्यान्न</u> प्रमदितव्यम्।<br>(ii) <u>इति+उक्त्वा</u> ऋतधवजः तूष्णीम् अतिष्ठत्।<br>(iii) सिन्धुलः <u>तत्+उत्सङ्गे</u> भोजमात्मानं मुमोच।<br>(iv) कस्य स्वजन<u>शब्दः+मे</u> लज्जाम् उत्पादयिष्यति।<br>(v) प्रजातन्तुं मा <u>वि+अवच्छेत्सीः</u>।<br>(vi) दीपस्य समीपमागत्य <u>संन्यासिनोक्तम्</u>।<br>(vii) त्यज! नाहं <u>पुनरायास्यामि</u>। | 1×6=6 |
| 6. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नपञ्चकम्)<br>(i) राजकुमारी मदालसा <u>सर्वविद्यासु निष्णाता</u> जाता।<br>(क) सर्वविद्यानिष्णातः (ख) सर्वविद्यानिष्णातम्<br>(ग) सर्वविद्यनिष्णाता (घ) सर्वविद्यानिष्णाता | 1×5=5 |

| | | |
|---|---|---|
| | (ii) समक्षं ते कथं कापि **सपत्नी** स्थातुं शक्नोति?<br>(क) समानः पतिः यस्याः सा (ख) समा पत्नी यस्य सः<br>(ग) पत्नी सदृशः (घ) पत्न्या सहितम्<br>(iii) लक्ष्मणः **सक्रोधम्** अवदत्।<br>(क) क्रोधस्य सहितम् (ख) क्रोधात् सह<br>(ग) क्रोधेन सहितम् (घ) क्रोधम् सहितम्<br>(iv) यानि **अनवद्यानि** कर्माणि तानि सेवितव्यानि।<br>(क) न अवद्यानि (ख) न वद्यानि<br>(ग) अवद्यानि (घ) अन वद्यानि<br>(v) तत्किमपि **इच्छाम् अनतिक्रम्य** पृच्छ।<br>(क) यथेच्छम् (ख) इच्छामनतिक्रम्य<br>(ग) यथा इच्छाम् (घ) इच्छाम् अनुसारम्<br>(vi) जनः **कामं च क्रोधं च लोभं च** त्यजेत्।<br>(क) कामक्रोधलोभम् (ख) कामक्रोधलोभाः<br>(ग) कामक्रोधलोभा (घ) कामक्रोधलोभान् | |
| **7.** | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) भवतः स्थैर्यमुत्पादयता मया एवम् **अभिहितम्**।<br>(क) अभि+धा+क्त (ख) अभि+हि+क्त<br>(ग) अभि+ हित् +क्त (घ) अभि+धा+क्तम्<br>(ii) दौवारिकः भुशुण्डीं स्कन्धे निधाय निपुणं **निरीक्षमाणः** असीत्।<br>(क) निर्+इक्ष् +माणः (ख) निर्+ईक्ष्+अण्<br>(ग) निर्+ईक्ष्+शान (घ) निर्+ईक्ष्+शानच्<br>(iii) यानि अनवद्यानि कर्माणि तानि **सेव्+अनीयर्**।<br>(क) सेवनीय (ख) सेवनीयम्<br>(ग) सेवनीयः (घ) सेवनीयानि<br>(iv) अहं **बलवान्** सिद्धः सुखी च अस्मि।<br>(क) बल+वान् (ख) बल+क्तवतु<br>(ग) बल+मतुप् (घ) बल + वत | **1×6=6** |

| | | |
|---|---|---|
| | (v) भगवन्! **<u>संन्यास + इन्</u>** तुरीयाश्रमसेवीति प्रणम्यते।<br>(क)संन्यासिनि (ख) संन्यासी<br>(ग) संन्यासनि (घ) संन्यासन्<br>(vi) एषा नियती इव **<u>व्यवस्थित + टाप्</u>**।<br>(क) व्यवस्थिता (ख) व्यवस्थितम्<br>(ग) व्यवस्थितता (घ) व्यवस्थितः<br>(vii) या च मया **<u>पुत्रवती</u>**।<br>(क) पुत्रवत् + ङीप् (ख) पुत्र + टाप्<br>(ग) पुत्रवति + ङीप् (घ) पुत्र + ङीप् | |
| | | |
| 8. | **कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कृत्वा लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) --------------- न प्रमदितव्यम्।<br>(क) स्वाध्यायेन (ख) स्वाध्यायात्<br>(ग) स्वाध्यायम् (घ) स्वाध्यायस्य<br>(ii) यस्याः --------------- समः भर्ता वर्तते।<br>(क) शक्रम् (ख) शक्रेण<br>(ग) शक्रस्य (घ) शक्रात्<br>(iii) ततः क्रमाद् राजनि -------------- सति सम्प्राप्तराज्य-सम्पत्तिर्मुञ्जः।<br>(क) दिवङ्गतेन (ख) दिवङ्गतस्य<br>(ग) दिवङ्गते (घ) दिवङ्गतम्<br>(iv) सः पुनः --------------- अनन्तरं तमेव पादध्वनिं श्रुतवान्।<br>(क) क्षणात् (ख) क्षणेन<br>(ग) क्षणाय (घ) क्षणम् | 1×3=3 |
| | **खण्डः – घ भागः - I**<br>**पठितावबोधनम् 25 अङ्काः** | |
| 9. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत –**<br>वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह-त्वं मम सेवकोऽसि मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि | 5 |

| | | |
|---|---|---|
| | वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह- श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान्- वत्सराज! खड्गप्रहारसमये तेन किमुक्तम्?<br>वत्सराजेन च राज्ञे भोजस्य अन्तिमसन्देशरूपेण तत्प्रदत्तः श्लोकः समर्पितः। | |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | ½x2=1 |
| | (i) वत्सराजः भोजं कुत्र नीतवान्?<br>(ii) कस्य वचनमाकर्ण्य राजा कुपितः अभवत्?<br>(iii) कृत्रिमरूपेण भोजस्य किं कारितम्? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (i) राजा भोजवधं ज्ञात्वा किं पृष्टवान्?<br>(ii) वैराग्यं प्राप्य वत्सराजः किं कृतवान्?<br>(iii) वत्सराजः किमर्थं तूष्णीं बभूव? | |
| | **इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (i) **'वैराग्यमापन्नो वत्सराजः'** अनयोः पदयोः विशेषणपदं किम्?<br>(ii) **'पृष्टवान्'** इति क्रियापदस्य कर्तृपदं किम्?<br>(iii) **'तं न हतवान्'** अत्र **'तम्'** इति सर्वनामपदं कस्मै प्रयुक्तम्? | |
| | | |
| 10. | **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -** | 5 |
| | **रूपं प्रसिद्धं न बुधास्तदाहु**<br>**विद्यावतां वस्तुत एव रूपम्।**<br>**अपेक्षया रूपवतां हि विद्या**<br>**मानं लभन्तेऽतितरां जगत्याम्॥** | |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | ½x2=1 |
| | (i) केषां रूपं रूपं भवति?<br>(ii) के प्रसिद्धं रूपम् आहुः?<br>(iii) विद्यावन्तः कुत्र मानं लभन्ते? | |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) केषाम् अपेक्षया बुधाः विद्यामानं लभन्ते?<br>(ii) बुधाः किम् आहुः?<br>(iii) जनाः कथं मानं लभन्ते?<br>**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) **'आहुः'** इति क्रियापदस्य कर्तृपदं किम्?<br>(ii) **'संसारे'** अस्मिन् अर्थे किं पदं प्रयुक्तम्?<br>(iii) **'मूढाः'** इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत। | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 11. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>**संन्यासी** - तत् किं कोऽपि न प्रविशति रात्रौ?<br>**दौवारिकः** - (साक्षेपम्) कोऽपि कथं न प्रविशति? परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रविशन्ति, न तु ये केऽपि समागता भवादृशाः।<br>**संन्यासी** - दौवारिक! इत आयाहि किमपि कर्णे कथयिष्यामि।<br>**दौवारिकः** - (तथा कृत्वा) कथ्यताम्।<br>**संन्यासी** - यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः तदधुनैव परिष्कृतपारदभस्म तुभ्यं दद्याम् यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्संख्याकतुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुयाः।<br>**दौवारिकः** - हंहो, कपटसंन्यासिन्! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि? ते केचनान्ये भवन्ति नीचा ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति न वयं शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वम्? कुत आयातः? केन वा प्रेषितः? अहं तु त्वां कस्यापि देशद्रोहिणो गूढचरं मन्ये। (हस्तमाकृष्य) तदागच्छ तु दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) संन्यासी उत्कोचरूपेण किं दातुम् इच्छति?<br>(ii) दौवारिकः संन्यासिनं किं मनुते?<br>(iii) कोऽपि कदा न प्रविशति? | 5<br><br><br><br><br><br><br><br><br><br><br><br><br><br>½×2=1 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) संन्यासी दौवारिकस्य कर्णे किं कथयति?<br>(ii) के नीचाः भवन्ति?<br>(iii) दौवारिकः (साक्षेपम्) किं कथयति?<br>**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) **'सत्यं कथय कस्त्वम्?'** इत्यत्र **'त्वम्'** इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(ii) **'शक्नुयाः'** इति क्रियापदस्य कर्तृपदं किम्?<br>(iii) **'दिवसे'** इति पदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम्? | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 12. | **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br>**असौ मया हतः शत्रुर्हनिष्ये चापरानपि।**<br>**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥**<br>**भावार्थः –**<br>अहम् एनं शत्रुं (i) ..............., अन्यान् शत्रून् अपि मारयिष्यामि। अहं सर्वसमर्थः, (ii) .......... सर्वं साधयितुं (iii) ............., शक्तिशाली, प्रसन्नः, सुविधासम्पन्नः च अस्मि (इति अज्ञानमोहितैः कथ्यते।)<br>**मञ्जूषा-**<br>भोग्यसामग्रीयुक्तः, समर्थः, मारितवान्।<br>**अथवा**<br>**प्रदत्ते भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>**(क) 'सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।'**<br>(i) खलः नरः दुष्टताम् आचरति।<br>(ii) सज्जनानां सुवचनं त्याज्यं भवति।<br>(iii) दुष्टानां प्रयासः सुवचनं त्यक्त्वा दोषेषु/व्यसनेषु भवति।<br>**(ख) 'युधिष्ठिरस्य एषा एव चिन्तनसरणिः'।**<br>(i) ज्येष्ठपाण्डुपुत्रस्य ईदृशी एव विचारधारा।<br>(ii) युधिष्ठिरस्य कुलपरंपरा ईदृशी एव।<br>(iii) तस्य ईदृशी प्रवृत्तिः न आसीत्। | 1×3=3<br><br><br><br><br><br><br><br><br>1×3=3 |

| | | |
|---|---|---|
| | **(ग) सर्वस्य लोचनं शास्त्रम्।**<br>(iii) शास्त्राणां ज्ञानं केषाञ्चिदेव लोचनं भवति।<br>(ii) शास्त्रलोचनं केवलं वीराणां भवति।<br>(iii) शास्त्राणां ज्ञानं सर्वेषां लोचनं भवति। | |
| | | |
| 13. | **अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत –**<br>**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**<br>**आगमैः सदृशारम्भ आरम्भसदृशोदयः॥**<br>**अन्वयः –**<br>(दिलीपः) (i)………………. प्रज्ञया सदृशागमः (ii) ……….. सदृशारम्भः<br>(iii) …………………….. उदयः (च आसीत्)। | 1×3=3 |
| | | |
| 14. | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) वेदमनूच्याचार्यः — (क) प्रजातन्तुं मा व्यवच्छेत्सीः।<br>(ii) यान्यनवद्यानि कर्माणि — (ख) वृत्तविचिकित्सा वा स्यात्।<br>(iii) आचार्याय प्रियं धनमाहृत्य — (ग) तानि सेवितव्यानि।<br>(iv) यदि ते कर्मविचिकित्सा वा — (घ) अन्तेवासिनमनुशास्ति। | ½×4=2 |
| | | |
| 15. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं शुद्धम् उत्तरं चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) त्यागाय सम्भृतार्थानां सत्याय **मितभाषिणाम्**।<br>(ii) **वार्धके** मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।<br>(iii) प्राजानामेव **भूत्यर्थं** स ताभ्यो बलिमग्रहीत्।<br>(iv) केवलं महाराजशिववीरस्याज्ञां वयं सिरसा **वहामः**।<br>(v) त्वादृशा एव वस्तुतः पुरस्कार-**भाजनानि** भवन्ति।<br>**मञ्जूषा**<br>पालयामः, अल्पभाषिणाम्, पात्राणि, कल्याणार्थम्, जरायाम् | ½×4=2 |
| | | |

| खण्डः – घ भागः - ii 10 अङ्काः<br>संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः | | |
|---|---|---|
| 16. | समुचितस्य रचनायाः कवेः वा अभिधानं लिखत- (केवलं प्रश्नत्रयम् )<br>(i) **“नैकेनापि समं गता वसुमती”** इत्ययं पाठः कस्मात् ग्रन्थात् सङ्कलितः?<br>(ii) **“आचार्य-अंबिकादत्त-व्यासेन”** विरचिता प्रसिद्धा रचना का?<br>(iii) **“कार्याकार्यव्यवस्थितिः”** इत्ययं पाठः कस्मात् ग्रन्थात् सङ्कलितः?<br>(iv) **“रघुवंशम्”** इत्यस्याः रचनायाः लेखकः कः? | 1×3=3 |
| | | |
| 17. | गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चित्वा रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नत्रयम्)<br>(i) **खण्डकाव्यं** -------- भेदः अस्ति।<br>(ii) **वासवदत्ता** ----------- काव्यम् अस्ति।<br>(iii) ----------- **पद्यकाव्यस्य** वैशिष्ट्यं भवति।<br>(iv) ----------- **चम्पूकाव्यं** भवति।<br>**मञ्जूषा –**<br>गद्यपद्यमयम्, गेयता, पद्यकाव्यस्य, गद्यकाव्यम्। | 1×3=3 |
| | | |
| 18. | नाट्यतत्त्वानि अधिकृत्य समुचितं मेलयत -<br>‘क’ भागः — ‘ख’ भागः<br>(i) काव्येषु रम्यम् — भरतमुनिः<br>(ii) अभिज्ञानशाकुन्तलम् — राजनैतिकं नाटकम्<br>(iii) नाट्यशास्त्रस्य कर्ता — नाटकम्<br>(iv) मुद्राराक्षसम् — कालिदासस्य प्रसिद्धा रचना | 1×4=4 |

----------******** ------------***************----------------********----------